श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे

# ॥ त्रयोदशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ त्रयोदशः सर्गः ॥

## राज्ञो वसिष्ठं प्रति यज्ञसमारम्भायानुरोधस्तेन तदर्थं सेवकानां नियुक्ती राज्ञामामन्त्रणाय तस्य सुमन्त्रं प्रत्यादेशः समागतनरेशानां सत्कारः सपत्नीकेन राज्ञा यज्ञदीक्षाया ग्रहणं च

पुनः प्राप्ते वसन्ते तु पूर्णः संवत्सरोऽभवत्।
प्रसवार्थं गतो यष्टुं हयमेधेन वीर्यवान्॥ **1.13.1** ॥

अभिवाद्य वसिष्ठं च न्यायतः प्रतिपूज्य च।
अब्रवीत् प्रश्रितं वाक्यं प्रसवार्थं द्विजोत्तमम्॥ **1.13.2** ॥

यज्ञो मे क्रियतां ब्रह्मन् यथोक्तं मुनिपुङ्गव।
यथा न विघ्नाः क्रियन्ते यज्ञाङ्गेषु विधीयताम्॥ **1.13.3** ॥

भवान् स्निग्धः सुहृन्मह्यं गुरुश्च परमो महान्।
वोढव्यो भवता चैव भारो यज्ञस्य चोद्यतः॥ **1.13.4** ॥

तथेति च स राजानमब्रवीद् द्विजसत्तमः।
करिष्ये सर्वमेवैतद् भवता यत् समर्थितम्॥ **1.13.5** ॥

ततोऽब्रवीद् द्विजान् वृद्धान् यज्ञकर्मसुनिष्ठितान्।
स्थापत्ये निष्ठितांश्चैव वृद्धान् परमधार्मिकान्॥ **1.13.6** ॥

कार्मान्तिकाञ्शिल्पकारान् वर्धकीन् खनकानपि।
गणकाञ्शिल्पिनश्चैव तथैव नटनर्तकान्॥ **1.13.7** ॥

तथा शुचीञ्शास्त्रविदः पुरुषान् सुबहुश्रुतान्।
यज्ञकर्म समीहन्तां भवन्तो राजशासनात्॥ **1.13.8** ॥

इष्टका बहुसाहस्री शीघ्रमानीयतामिति।
उपकार्याः क्रियन्तां च राज्ञो बहुगुणान्विताः॥ **1.13.9** ॥

ब्राह्मणावसथाश्चैव कर्तव्याः शतशः शुभाः।
भक्ष्यानपानैर्बहुभिः समुपेताः सुनिष्ठिताः॥ **1.13.10** ॥

तथा पौरजनस्यापि कर्तव्याश्च सुविस्तराः।
आगतानां सुदूराच्च पार्थिवानां पृथक् पृथक्॥ **1.13.11** ॥

वाजिवारणशालाश्च तथा शय्यागृहाणि च।
भटानां महदावासा वैदेशिकनिवासिनाम्॥ **1.13.12** ॥

आवासा बहुभक्ष्या वै सर्वकामैरुपस्थिताः।
तथा पौरजनस्यापि जनस्य बहुशोभनम्॥ **1.13.13** ॥

दातव्यमन्नं विधिवत् सत्कृत्य न तु लीलया।
सर्वे वर्णा यथा पूजां प्राप्नुवन्ति सुसत्कृताः॥ **1.13.14** ॥

न चावज्ञा प्रयोक्तव्या कामक्रोधवशादपि।
यज्ञकर्मसु ये व्यग्राः पुरुषाः शिल्पिनस्तथा॥ **1.13.15** ॥

तेषामपि विशेषेण पूजा कार्या यथाक्रमम्।
ये स्युः सम्पूजिताः सर्वे वसुभिर्भोजनेन च॥ **1.13.16** ॥

यथा सर्वं सुविहितं न किञ्चित् परिहीयते।
तथा भवन्तः कुर्वन्तु प्रीतियुक्तेन चेतसा॥ **1.13.17** ॥

ततः सर्वे समागम्य वसिष्ठमिदमब्रुवन्।
यथेष्टं तत् सुविहितं न किञ्चित् परिहीयते॥ **1.13.18** ॥

यथोक्तं तत् करिष्यामो न किञ्चित् परिहास्यते।
ततः सुमन्त्रमाहूय वसिष्ठो वाक्यमब्रवीत्॥ **1.13.19** ॥

निमन्त्रयस्व नृपतीन् पृथिव्यां ये च धार्मिकाः।
ब्राह्मणान् क्षत्रियान् वैश्याञ्शूद्रांश्चैव सहस्रशः॥ **1.13.20** ॥

समानयस्व सत्कृत्य सर्वदेशेषु मानवान्।
मिथिलाधिपतिं शूरं जनकं सत्यवादिनम्॥ **1.13.21** ॥

तमानय महाभागं स्वयमेव सुसत्कृतम्।
पूर्वं सम्बन्धिनं ज्ञात्वा ततः पूर्वं ब्रवीमि ते॥ **1.13.22** ॥

तथा काशिपतिं स्निग्धं सततं प्रियवादिनम्।
सद्वृत्तं देवसङ्काशं स्वयमेवानयस्व ह॥ **1.13.23** ॥

तथा केकयराजानं वृद्धं परमधार्मिकम्।
श्वशुरं राजसिंहस्य सपुत्रं तमिहानय॥ **1.13.24** ॥

अङ्गेश्वरं महेष्वासं रोमपादं सुसत्कृतम्।
वयस्यं राजसिंहस्य सपुत्रं तमिहानय॥ **1.13.25** ॥

तथा कोसलराजानं भानुमन्तं सुसत्कृतम्।
मगधाधिपतिं शूरं सर्वशास्त्रविशारदम्॥ **1.13.26** ॥

प्राप्तिज्ञं परमोदारं सत्कृतं पुरुषर्षभम्।
राज्ञः शासनमादाय चोदयस्व नृपर्षभान्।
प्राचीनान् सिन्धुसौवीरान् सौराष्ट्रेयांश्च पार्थिवान्॥ **1.13.27** ॥

दाक्षिणात्यान् नरेन्द्रांश्च समस्तानानयस्व ह।
सन्ति स्निग्धाश्च ये चान्ये राजानः पृथिवीतले॥ **1.13.28** ॥

तानानय यथा क्षिप्रं सानुगान् सहबान्धवान्।
एतान् दूतैर्महाभागैरानयस्व नृपाज्ञया॥ **1.13.29** ॥

वसिष्ठवाक्यं तच्छ्रुत्वा सुमन्त्रस्त्वरितं तदा।
व्यादिशत् पुरुषांस्तत्र राज्ञामानयने शुभान्॥ **1.13.30** ॥

स्वयमेव हि धर्मात्मा प्रयातो मुनिशासनात्।
सुमन्त्रस्त्वरितो भूत्वा समानेतुं महामतिः॥ **1.13.31** ॥

ते च कर्मान्तिकाः सर्वे वसिष्ठाय महर्षये।
सर्वं निवेदयन्ति स्म यज्ञे यदुपकल्पितम्॥ **1.13.32** ॥

ततः प्रीतो द्विजश्रेष्ठस्तान् सर्वान् मुनिरब्रवीत्।
अवज्ञया न दातव्यं कस्यचिल्लीलयापि वा॥ **1.13.33** ॥

अवज्ञया कृतं हन्याद् दातारं नात्र संशयः।
ततः कैश्चिदहोरात्रैरुपयाता महीक्षितः॥ **1.13.34** ॥

बहूनि रत्नान्यादाय राज्ञो दशरथस्य ह।
ततो वसिष्ठः सुप्रीतो राजानमिदमब्रवीत्॥ **1.13.35** ॥

उपयाता नरव्याघ्र राजानस्तव शासनात्।
मयापि सत्कृताः सर्वे यथार्हं राजसत्तम॥ **1.13.36** ॥

यज्ञियं च कृतं सर्वं पुरुषैः सुसमाहितैः।
निर्यातु च भवान् यष्टुं यज्ञायतनमन्तिकात्॥ **1.13.37** ॥

सर्वकामैरुपहृतैरुपेतं वै समन्ततः।
द्रष्टुमर्हसि राजेन्द्र मनसेव विनिर्मितम्॥ **1.13.38** ॥

तथा वसिष्ठवचनादृष्यशृङ्गस्य चोभयोः।
दिवसे शुभनक्षत्रे निर्यातो जगतीपतिः॥ **1.13.39** ॥

ततो वसिष्ठप्रमुखाः सर्व एव द्विजोत्तमाः।
ऋष्यशृङ्गं पुरस्कृत्य यज्ञकर्मारभंस्तदा ॥ **1.13.40** ॥

यज्ञवाटं गताः सर्वे यथाशास्त्रं यथाविधि।
श्रीमांश्च सह पत्नीभी राजा दीक्षामुपाविशत् ॥ **1.13.41** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे त्रयोदशः सर्गः ॥